प्राप्तप्रतिषेधादात्माश्रयत्वं कामानां स्रुतमेवेति चेत् न "सुधीः स्वप्नोभूत्वेति" परनिमित्तत्वात् कामाश्रयत्वप्राप्तेः असङ्गवचनाच्च। न हि कामाश्रयत्वेऽसङ्गवचनमुपपद्यते। सङ्गञ्च काम इत्यवोचाम। आत्मकाम इति श्रुतेरात्मविषयेऽस्य कामो भवतीति चेत् न व्यतिरिक्तकामनाभावार्थत्वात्तस्याः, वैशेषिकादितन्त्रन्यायोपपन्नमात्मनः कामाद्याश्रयत्वमिति चेत् न हृदि श्रिता इत्यादिविशेषश्रुतिविरोधादनपेक्ष्यास्ता वैशेषिकादितन्त्रोपपत्तयः श्रुतिविरोधे न्यायाभासत्वोपगमात् स्वयंज्योतिष्ट्वबाधनाच्च। कामादीनाञ्च स्वप्ने केवलदर्शिमात्रविषयत्वात् स्वयंज्योतिष्टं सिद्धम् स्थितञ्च बाध्येतात्मसमवायित्वे। दृश्यत्वानुपपत्ते सच्चुर्गतविशेषवत्। द्रष्टु र्हि दृश्यमर्थान्तरभूतमिति द्रष्टुः स्वयंज्योतिष्टं सिद्धम् तद्बाधितं स्याद्यदि कामाद्याश्रयत्वं परिकल्प्येत। सर्वशास्त्रप्रतिषेधाच्च। परस्यैकदेशकल्पनायां कामाद्याश्रयत्वे च सर्व्वशास्त्रार्थजातं कुप्येत। एतच्च विस्तरेण चतुर्थेऽवोचाम। महता हि प्रयत्नेन कामाद्याश्रयत्वकल्पनाः प्रतिषेद्धव्याः। आत्मनः परेणैकत्वशास्त्रार्थसिद्धेः। तत्कल्पनायां पुनः क्रियमाणायां शास्त्रार्थ एव बाधितः स्यात्। यथेच्छादीनामात्मधर्मत्वं कल्पयन्तो वैशेषिका नैयायिकाश्चोपनिषच्छास्त्रार्थेन न सङ्गच्छन्ते तथेयमपि कल्पनोपनिषच्छास्त्रार्थबाधनान्नादरणीया"।

"काममय एवायं पुरुष इति यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत् कर्म्म कुरुते यत् कर्म कुरुते तदभिसम्पद्यते" इत्युपक्रम्य "तदेव सक्तः सह कर्मणैति लिङ्गं मनोयत्र निषक्तमस्य। प्राप्यान्तं कर्मणस्तस्य यत् किञ्चेह करोत्ययम्। तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्मणे" इति श्लोकमुदाहृत्य 'इति नु कामयमान"इत्युक्त्वा कामयमानस्यैव जन्मादिहेतुत्वमुक्त्वा

"अथाकामयमानोयोऽकामोनिष्काम आप्तकाम आत्मकामोन तस्य प्राणाह्युत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति वृ०उप०। "इति नु एवं नु कामयमानः संसरति यस्मात् कामयमान एवैवं संसरत्यथ तस्मादकायमानो न क्वचित् संसरति फलासक्तस्य हि गतिरुक्ता। अकामस्य हि क्रियानुपपत्तेः अकामयमानो मुच्यते। एवं कथं पुनरकामयमानो भवति?। योऽकामो भवत्यसावकामयमानः। कथमकामता? इत्युच्यते। यो निःकामो यस्मान्निर्गताः कामाःसोऽयं निष्कामः। कथं कामा निर्गच्छन्ति?। य आप्तकामो भवति। आप्ताः कामा येन स आप्तकामः। कथमाप्यन्ते कामाः? आत्मकामत्वेन यस्यात्मैव नान्यः कामयितव्यो वस्त्वन्तरभूतः पदार्थो भवति। आत्मैवान्तरो बाह्यः कृत्स्नः प्रज्ञानघन एकरसो नोर्द्ध्वं न तिर्य्यग्नाधः। आत्मनोऽन्यत्कामयितुम् "यस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् शृणुयान्मन्वीत विजानीयाद्वा" एवं विजानन् किङ्कामयेत्?। ज्ञायमानो ह्यन्यत्वेन पदार्थः कामयितव्यो भवति। न चासावन्यो ब्रह्मविद आप्तकामस्यास्ति। य एवात्मकामतयाऽऽप्तकामः स निष्कामोऽकामोऽकामयमानश्चेति मुच्यते। न हि यस्यात्मैव सर्व्वं भवति तस्यानात्मा कामयितव्योऽस्ति। अनात्मा चान्यः कामयितव्यः। सर्वञ्चात्मैवाभूदिति प्रतिषिद्धम् सर्वात्मदर्शिनः कामयितव्याभावात् कामानुपपत्तिः। ये तु प्रत्यवायपरिहारार्थं कर्म कल्पयन्ति ब्रह्मविदोऽपि तेषां नात्मैव सर्वं भवति। प्रत्यवायस्य जिहासितव्यस्यात्मनोऽन्यस्याभिप्रेतत्वात्। येन चाशनायाद्यतीतो नित्यं प्रत्यवायासम्बद्धो विदित आत्मा तं वयं ब्रह्मविदं ब्रूमः। यस्य नित्यमेवाशनायाद्यतीतमात्मानं पश्यति। यस्माच्च जिहासितव्यमन्यमुपादेयं वा यो न पश्यति तस्य कर्म्म न शक्यत एव सम्बद्धुम्। यस्त्वब्रह्मवित्तस्य भवत्येव प्रत्यवायपरिहारार्थं कर्मेति न विरोधः। अतः कामाभावादकामयमानो न जायते मुच्यत एव। तस्यैवमकामयमानस्य कर्माभावे गमनकारणाभावात् प्राणा वागादयो नोत्क्रामन्ति नोर्द्ध्वं क्रामन्ति देहात्। स च विद्वानाप्तकाम आत्मकामतया इहैव ब्रह्मभूतः। सर्वात्मनो हि ब्रह्मणो दृष्टान्तत्वेन प्रदर्शितमेतद्रूपम्। "तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपमिति"। तस्य हि दार्ष्टान्तिकभूतोऽयमर्थ उपसंह्रियते। अथाकामयमान इत्यादिना। स कथमेवम्भूतो मुच्यते? इत्युच्यते। यो हि सुषुप्तावस्थमिव निर्विशेषमद्वैतमलुप्तचिद्रूपज्योतिःस्वभावमात्मानं पश्यति तस्यैवाकामयमानस्य कर्माभावे गमनकारणाभावात् प्राणवागादयो नोत्क्रामन्ति। किन्तु विद्वान् स इहैव ब्रह्म भवति यद्यपि देहवानिव लक्ष्यते। स ब्रह्मैव सन् ब्रह्माप्येति। यस्मान्न हि तस्याब्रह्मत्वपरिच्छेदहेतवः कामाः सन्ति। तस्मादिहैव ब्रह्मैव सन् ब्रह्माप्येति न शरीरपातोत्तरकालम्। न हि विदुषो मृतस्य भावान्तरापत्तिर्जीवतोऽन्यो भावः देहान्तरप्रतिसन्धानाभावमात्रेणैव तु ब्रह्माप्येतीत्युच्यते। भावान्तरापत्तौ हि मोक्षस्य सर्वोपनिषद्विवक्षितोऽर्थ आत्मैकताख्यः स बाधितो